# तिङन्तप्रकरणम्

तिङन्तम् इत्यनेन पूर्णक्रियापदम् एव उद्दिष्टम्। तिङन्तं पदं क्रियापदं बोध्यम्। तिङ् इति अष्टादशप्रत्ययानां समाहारः। तेषु 'तिप्' आरभ्य 'मस्' पर्यन्ताः नव परस्मैपदसंज्ञकाः, अन्ये नव आत्मनेपदसंज्ञकाः च भवन्ति।

परस्मैपदप्रत्ययाः।

| | | | |
|---|---|---|---|
| प्र.पुरुषः | तिप् | तस् | झि |
| म.पुरुषः | सिप् | थस् | थ |
| उ.पुरुषः | मिप् | वस् | मस् |

आत्मनेपदप्रत्ययाः।

| | | | |
|---|---|---|---|
| प्र.पुरुषः | त | आतां | झ |
| म.पुरुषः | थास् | आथां | ध्वम् |
| उ.पुरुषः | इट् | वहिङ् | महिङ् |

प्रत्येकं विभागस्य च प्रथमपुरुषः, मध्यमपुरुषः, उत्तमपुरुषः इति त्रयः विभागाः विद्यन्ते। ते च कर्तृपदमाश्रित्य परिगणिताः। 'अहम् - आवां - वयम्' इति उत्तमपुरुषस्य एकवचनद्विवचनबहुवचनरूपाणां कर्तृपदानि भवन्ति। 'त्वं - युवां - यूयम्' इति पदानि मध्यमपुरुषस्य एकवचनद्विवचनबहुवचनरूपाणां कर्तृपदानि भवन्ति। अन्ये रामः, सीता, वनं, भवान्, गौः इत्यादयः सर्वे प्रथमपुरुषरूपाणां कर्तृत्वेन कल्पिताः।

क्रियापदानि कर्तुः वचनानुसारीणि भवन्ति। कर्ता एकवचनं चेत् क्रिया अपि तदनुसारिणी। कर्तुः एकत्वेन एकवचनम्। कर्तुः द्वित्वे द्विवचनम् कर्तुः बहुत्वेन बहुवचनम्।

यथा -

परस्मैपदे - प्रथमपुरुषस्य एकवचने द्विवचने बहुवचने च क्रियारूपाणि।

बालः पठति

बालौ पठतः

बालाः पठन्ति

परस्मैपदे - मध्यमपुरुषस्य एकवचने द्विवचने बहुवचने च क्रियारूपाणि।

त्वं पठसि

युवां पठथः

युयं पठथ

परस्मैपदे - उत्तमपुरुषस्य एकवचने द्विवचने बहुवचने च क्रियारूपाणि।

अहं पठामि

आवां पठावः

वयं पठामः

आत्मनेपदे - प्रथमपुरुषस्य एकवचने द्विवचने बहुवचने च क्रियारूपाणि।

बालाः वन्दते

बालौ वन्देते

बालाः वन्दन्ते

आत्मनेपदे - मध्यमपुरुषस्य एकवचने द्विवचने बहुवचने च क्रियारूपाणि।

त्वं वन्दसे

युवां वन्देथे

यूयं वन्दध्वे

आत्मनेपदे - उत्तमपुरुषस्य एकवचने द्विवचने बहुवचने च क्रियारूपाणि।

अहं वन्दे

आवां वन्दावहे

वयं वन्दामहे